# Shri Guruvayupureshvara Ashtottarashatanama Stotraratnam

# શ્રીગુરુવાયુપુરેશ્વરાષ્ટોત્તરશતનામસ્તોત્રરત્નમ્

## Document Information

Text title : guruvAyupureshvarAShTottarashatanAmastotram

File name : guruvAyupureshvarAShTottarashatanAmastotram.itx

Category : vishhnu, aShTottarashatanAma

Location : doc_vishhnu

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com, PSA Easwaran

Latest update : November 29, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીગુરુવાયુપુરેશ્વરાષ્ટોત્તરશતનામસ્તોત્રરત્નમ્

શ્રીવિદ્યારાજગોપાલાભિધશ્રીમહાવૈકુણ્ઠેશ્વરસ્વરૂપ
શ્રીગુરુવાયુપુરેશ્વરાષ્ટોત્તરશતનામસ્તોત્રરત્નમ્ ॥

પાર્વત્યુવાચ -
દેવદેવ મહાદેવ મહાવૈષ્ણવતલ્લજ ।
જીવવાતપુરેશસ્ય માહાત્મ્યમખિલં ત્વયા ॥ ૧॥

મન્ત્રતન્ત્રરહસ્યાઢ્યૈઃ સહસ્રાધિકનામભિઃ ।
અદ્ય મે પ્રેમભારેણોપન્યસ્તમિદમદ્ભુતમ્ ॥ ૨॥

મહાવૈકુણ્ઠનાથસ્ય પ્રભાવમખિલં પ્રભો ।
સઙ્ગ્રહેણ શ્રોતુમદ્ય ત્વરાયુક્તાસ્મ્યહં પ્રભો ॥ ૩॥

યસ્ય શ્રવણમાત્રેણ જીવવૃન્દેષુ સર્વતઃ ।
નાતિકૃચ્છ્રેણ યત્નેન લસેયુઃ સર્વસિદ્ધયઃ ॥ ૪॥

તાદૃશં સુલભં સ્તોત્રં શ્રોતુમિચ્છામિ ત્વન્મુખાત્ ।
ઈશ્વર ઉવાચ -
મહાદેવિ શિવે ભદ્રે જીવવાતપુરેશિતુઃ ॥ ૫॥

માહાત્મ્યવારિધૌ મગ્નઃ પૂરયામિ ત્વદીપ્સિતમ્ ।
પૂર્વં યન્નામસાહસ્રં તસ્ય દેવસ્ય ભાષિતમ્ ॥ ૬॥

તસ્યાદૌ વિજૃમ્ભમાણૈરષ્ટાધિકશતેન તુ ।
નામભિર્નિર્મિતં સ્તોત્રં સર્વસિદ્ધિવિધાયકમ્ ॥ ૭॥

પઠિતું નામસાહસ્રં અશક્તાઃ સન્તિ યે શિવે ।
તેષામર્થે સ્તોત્રમેતત્સઙ્ગૃહીતં ફલપ્રદમ્ ॥ ૮॥

અનુકૂલૌ દેશકાલૌ યસ્ય સ્તો જગતીહ તુ ।
પઠિતવ્યં તેન નામસાહસ્રં યત્નતઃ શિવે ॥ ૯॥

આલસ્યદૂષિતે ચિત્તે વિશ્વાસરહિતે તથા ।
ગુરુવાતપુરેશસ્ય ન હિ મૂર્તિઃ પ્રસીદતિ ॥ ૧૦॥

ગુરોરન્યત્ર વિશ્વાસી તથા વાતપુરેશિતુઃ ।
કથમેતત્ફલં પ્રોક્તં યથાવદધિગચ્છતિ ॥ ૧૧॥

એક એવ ગુરુર્યસ્ય વૈકુણ્ઠો યસ્ય દૈવતમ્ ।
તસ્ય ભક્તસ્ય નૂનં હિ સ્તોત્રમેતત્ફલિષ્યતિ ॥ ૧૨॥

અથ તે દેવિ વક્ષ્યામિ નામ્નામષ્ટોત્તરં શતમ્ ।
સ્તોત્રરાજમિમં પુણ્યં સાવધાનમનાઃ શ‍ૃણુ ॥ ૧૩॥

સ્તોત્રસ્યાસ્ય ઋષિઃ પ્રોક્તો દક્ષિણામૂર્તિરીશ્વરઃ ।
છન્દોઽનુષ્ટુપ્ તથા દેવો ગુરુવાયુપુરેશ્વરઃ ॥ ૧૪॥

રમાશક્તિસ્મરૈર્બીજૈઃ બીજશક્તી ચ કીલકમ્ ।
ધર્માર્થકામમોક્ષેષુ વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૧૫॥

મૂલમન્ત્રસ્ય ષડ્ભાગૈઃ કરાઙ્ગન્યાસમાચરેત્ ।
મહાવૈકુણ્ઠરૂપેણ ધ્યાતવ્યાત્ર હિ દેવતા ॥ ૧૬॥

ઇન્દ્રનીલસમચ્છાયં પીતામ્બરધરં હરિમ્ ।
શઙ્ખચક્રગદાપદ્મૈર્લસદ્બાહું વિચિન્તયેત્ ॥ ૧૭॥

ધ્યાનમ્ -
ક્ષીરામ્ભોધિસ્થકલ્પદ્રુમવનવિલસદ્રત્નયુગ્મણ્ટપાન્તઃ
શઙ્ખં ચક્રં પ્રસૂનં કુસુમશરચયં ચેક્ષુકોદણ્ડપાશૌ ।
હસ્તાગ્રૈર્ધારયન્તં સૃણિમપિ ચ ગદાં ભૂરમાઽઽલિઙ્ગિતં તં
ધ્યાયેત્સિન્દૂરકાન્તિં વિધિમુખવિબુધૈરીડ્યમાનં મુકુન્દમ્ ॥

અથ અષ્ટોત્તરશતનામસ્તોત્રમ્ ।
મહાવૈકુણ્ઠનાથાખ્યો મહાનારાયણાભિધઃ ।
તારશ્રીશક્તિકન્દર્પચતુર્બીજકશોભિતઃ ॥ ૧૯॥

ગોપાલસુન્દરીરૂપઃ શ્રીવિદ્યામન્ત્રવિગ્રહઃ ।
રમાબીજસમારમ્ભો હૃલ્લેખાસમલઙ્કૃતઃ ॥ ૨૦॥

મારબીજસમાયુક્તો વાણીબીજસમન્વિતઃ ।
પરાબીજસમારાધ્યો મીનકેતનબીજકઃ ॥ ૨૧॥

તારશક્તિરમાયુક્તઃ કૃષ્ણાયપદપૂજિતઃ ।
કાદિવિદ્યાદ્યકૂટાઢ્યો ગોવિન્દાયપદપ્રિયઃ ॥ ૨૨॥

કામરાજાખ્યકૂટેશો ગોપીજનસુભાષિતઃ ।
વલ્લભાયપદપ્રીતઃ શક્તિકૂટવિજૃમ્ભિતઃ ॥ ૨૩॥

વહ્નિજાયાસમાયુક્તઃ પરાવાઙ્મદનપ્રિયઃ ।
માયારમાસુસમ્પૂર્ણો મન્ત્રરાજકલેવરઃ ॥ ૨૪॥

દ્વાદશાવૃતિચક્રેશો યન્ત્રરાજશરીરકઃ ।
પિણ્ડગોપાલબીજાઢ્યઃ સર્વમોહનચક્રગઃ ॥ ૨૫॥

ષડક્ષરીમન્ત્રરૂપો મન્ત્રાત્મરસકોણગઃ ।
પઞ્ચાઙ્ગકમનુપ્રીતઃ સન્ધિચક્રસમર્ચિતઃ ॥ ૨૬॥

અષ્ટાક્ષરીમન્ત્રરૂપો મહિષ્યષ્ટકસેવિતઃ ।
ષોડશાક્ષરમન્ત્રાત્મા કલાનિધિકલાર્ચિતઃ ॥ ૨૭॥

અષ્ટાદશાક્ષરીરૂપોઽષ્ટાદશદલપૂજિતઃ ।
ચતુર્વિંશતિવર્ણાત્મગાયત્રીમનુસેવિતઃ ॥ ૨૮॥

ચતુર્વિંશતિનામાત્મશક્તિવૃન્દનિષેવિતઃ ।
ક્લીઙ્કારબીજમધ્યસ્થઃ કામવીથીપ્રપૂજિતઃ ॥ ૨૯॥

દ્વાત્રિંશદક્ષરારૂઢો દ્વાત્રિંશદ્ભક્તસેવિતઃ ।
પિણ્ડગોપાલમધ્યસ્થઃ પિણ્ડગોપાલવીથિગઃ ॥ ૩૦॥

વર્ણમાલાસ્વરૂપાઢ્યો માતૃકાવીથિમધ્યગઃ ।
પાશાઙ્કુશદ્વિબીજસ્થઃ શક્તિપાશસ્વરૂપકઃ ॥ ૩૧॥

પાશાઙ્કુશીયચક્રેશો દેવેન્દ્રાદિપ્રપૂજિતઃ ।
લિખિતો ભૂર્જપત્રાદૌ ક્રમારાધિતવૈભવઃ ॥ ૩૨॥

ઊર્ધ્વરેખાસમાયુક્તો નિમ્નરેખાપ્રતિષ્ઠિતઃ ।
સમ્પૂર્ણમેરુરૂપેણ સમ્પૂજિતોઽખિલપ્રદઃ ॥ ૩૩
મન્ત્રાત્મવર્ણમાલાભિઃ સમ્યક્શોભિતચક્રરાટ્ ।
શ્રીચક્રબિન્દુમધ્યસ્થયન્ત્રસંરાટ્સ્વરૂપકઃ ॥ ૩૪॥

કામધર્માર્થફલદઃ શત્રુદસ્યુનિવારકઃ ।
કીર્તિકાન્તિધનારોગ્યરક્ષાશ્રીવિજયપ્રદઃ ॥ ૩૫॥

પુત્રપૌત્રપ્રદઃ સર્વભૂતવેતાલનાશનઃ
કાસાપસ્મારકુષ્ઠાદિસર્વરોગવિનાશકઃ ॥ ૩૬॥

ત્વગાદિધાતુસમ્બદ્ધસર્વામયચિકિત્સકઃ ।
ડાકિન્યાદિસ્વરૂપેણ સપ્તધાતુષુ નિષ્ઠિતઃ ॥ ૩૭॥

સ્મૃતિમાત્રેણાષ્ટલક્ષ્મીવિશ્રાણનવિશારદઃ ।
શ્રુતિમૌલિસમારાધ્યમહાપાદુકલેવરઃ ॥ ૩૮॥

મહાપદાવનીમધ્યરમાદિષોડશીદ્વિકઃ ।
રમાદિષોડશીયુક્તરાજગોપદ્વયાન્વિતઃ ॥ ૩૯॥

શ્રીરાજગોપમધ્યસ્થમહાનારાયણદ્વિકઃ ।
નારાયણદ્વયાલીઢમહાનૃસિંહરૂપકઃ ॥ ૪૦॥

લઘુરૂપમહાપાદુઃ મહામહાસુપાદુકઃ ।
મહાપદાવનીધ્યાનસર્વસિદ્ધિવિલાસકઃ ॥ ૪૧॥

મહાપદાવનીન્યાસશતાધિકકલાષ્ટકઃ ।
પરમાનન્દલહરીસમારબ્ધકલાન્વિતઃ ॥ ૪૨॥

શતાધિકકલાન્તોદ્યચ્છ્રીમચ્ચરણવૈભવઃ ।
શિર-આદિબ્રહ્મરન્ધ્રસ્થાનન્યસ્તકલાવલિઃ ॥ ૪૩॥

ઇન્દ્રનીલસમચ્છાયઃ સૂર્યસ્પર્ધિકિરીટકઃ ।
અષ્ટમીચન્દ્રવિભ્રાજદલિકસ્થલશોભિતઃ ॥ ૪૪॥

કસ્તૂરીતિલકોદ્ભાસી કારુણ્યાકુલનેત્રકઃ ।
મન્દહાસમનોહારી નવચમ્પકનાસિકઃ ॥ ૪૫॥

મકરકુણ્ડલદ્વન્દ્વસંશોભિતકપોલકઃ ।
શ્રીવત્સાઙ્કિતવક્ષઃશ્રીઃ વનમાલાવિરાજિતઃ ॥ ૪૬॥

દક્ષિણોરઃ પ્રદેશસ્થપરાહઙ્કૃતિરાજિતઃ ।
આકાશવત્કશિષ્ઠશ્રીમધ્યવલ્લીવિરાજિતઃ ॥ ૪૭॥

શઙ્ખચક્રગદાપદ્મસંરાજિતચતુર્ભુજઃ ।
કેયૂરાઙ્ગદભૂષાઢ્યઃ કઙ્કણાલિમનોહરઃ ॥ ૪૮॥

નવરત્નપ્રભાપુઞ્જચ્છુરિતાઙ્ગુલિભૂષણઃ ।
ગુલ્ફાવધિકસંશોભિપીતચેલપ્રભાન્વિતઃ ॥ ૪૯॥

કિઙ્કિણીનાદસંરાજત્કાઞ્ચીભૂષણશોભિતઃ ।
વિશ્વક્ષોભકરશ્રીકમસૃણોરુદ્વયાન્વિતઃ ॥ ૫૦॥

ઇન્દ્રનીલાશ્મનિષ્પન્નસમ્પુટાકૃતિજાનુકઃ ।
સ્મરતૂણાભલક્ષ્મીકજઙ્ઘાદ્વયવિરાજિતઃ ॥ ૫૧॥

માંસલગુલ્ફલક્ષ્મીકો મહાસૌભાગ્યસંયુતઃ ।
હ્રીંઙ્કારતત્ત્વસમ્બોધિનૂપુરદ્વયરાજિતઃ ॥ ૫૨॥

આદિકૂર્માવતારશ્રીજયિષ્ણુપ્રપદાન્વિતઃ ।
નમજ્જનતમોવૃન્દવિધ્વંસકપદદ્વયઃ ॥ ૫૩॥

નખજ્યોત્સ્નાલિશૈશિર્યપરવિદ્યાપ્રકાશકઃ ।
રક્તશુક્લપ્રભામિશ્રપાદુકાદ્વયવૈભવઃ ॥ ૫૪॥

દયાગુણમહાવાર્ધિર્ગુરુવાયુપુરેશ્વરઃ ।

ફલશ્રુતિઃ -
ઇત્યેવં કથિતં દેવિ નામ્નામષ્ટોત્તરં શતમ્ ॥ ૫૫॥

ગુરુવાયુપુરેશસ્ય સર્વસિદ્ધિવિધાયકમ્ ।
કૃષ્ણાષ્ટમીસમારબ્ધમાસેનૈકેન સિદ્ધિદમ્ ॥ ૫૬॥

કૃષ્ણાષ્ટમીં સમારભ્ય યાવદન્યાઽસિતાઽષ્ટમી ।
તાવત્કાલં સ્તોત્રમેતત્ પ્રત્યહં શતશઃ પઠેત્ ॥ ૫૭॥

માતૃકાપુટિતં કૃત્વા હિત્વાઽઽલસ્યં સુમઙ્ગલે ।
એકાન્તભક્તિયુક્તો હિ ગુરુવાયુપુરેશ્વરે ॥ ૫૮॥

જીવન્નેવ સ ભક્તાગ્ર્યો માધવાધિષ્ઠિતો ભવેત્ ।
તપ્તકાઞ્ચનગૌરે હિ તચ્છરીરે સદા લસન્ ॥ ૫૯॥

ગુરુવાયુપુરાધીશોઽદ્ભુતાનિ હિ કરિષ્યતિ ।
અત આવાં મહેશાનિ ગચ્છાવઃ શરણં હિ તમ્ ॥ ૬૦॥

કારુણ્યમૂર્તિમીશાનં ગુરુવાયુપુરેશ્વરમ્ ।
ઉડ્ડામરેશતન્ત્રેઽસ્મિન્ પટલે ક્ષિપ્રસાધને ॥ ૬૧॥

મહાવૈકુણ્ઠનાથસ્ય ગુરુવાયુપુરેશિતુઃ ।
અષ્ટોત્તરશતં નામ્નાં સર્વસિદ્ધિવિલાસકમ્ ।

અધ્યાયં સપ્તમં પૂર્ણમવદાતં કરોત્યુમે ॥ ૬૨॥

ઇતિ શ્રીગુરુવાયુપુરેશ્વરાષ્ટોત્તરશતનામસ્તોત્રરત્નં સમ્પૂર્ણમ્ ।

॥ શુભમ્ ॥

Proofread by Aruna Narayanan narayanan.aruna at gmail.com, PSA Easwaran

*Shri Guruvayupureshvara Ashtottarashatanama Stotraratnam*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*